International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(5): 61-63
© 2024 IJSR
www.anantaajournal.com
Received: 02-08-2024
Accepted: 06-09-2024

**Antara Bhattacharya**
Ranchi University, Shahid Chowk, Ranchi, Jharkhand, India

**Corresponding Author:**
**Antara Bhattacharya**
Ranchi University, Shahid Chowk, Ranchi, Jharkhand, India

# पाणिनियाष्टके अनुल्लिखितः प्रचीनाचार्याः

## Antara Bhattacharya

**सारांश**
प्राचीनविद्वांसः संस्कृतव्याकरणं युगत्रयेषु विभक्तवन्तः। ते क्रमशः प्रथमतः प्राक् पाणिनियुगः, द्वितीयतः पाणिनिः वा त्रिमुनि युगः, तृतीयतः पाणिनि परवर्तीयुगः इति। महर्षिः पाणिनिः यद्यपि संस्कृतव्याकरणशास्त्रजगति अत्यन्तं तेजस्वी ज्योतिष्कम, परन्तु सः प्रथमः वैयाकरणः नासीत, न तु तस्य विरचितः व्याकरणग्रन्थः प्रथमः संस्कृत व्याकरणग्रन्थः। वस्तुतः व्याकरणशास्त्रज्ञानाम् दीर्घपरम्परां विना पाणिनिसदृशः विलक्षणः व्याकरणज्ञः कदापि न उद्‌भवति स्म। पाणिनिः स्वस्य अष्टाध्यायीग्रन्थे विंशतिसूत्रेषु दश आचार्यनामानि उल्लेखयति। परन्तु तदतिरिक्तं वहवः पूर्वाचार्याः वैयाकरणाः आसन। तेषां नामानि आचार्यः पाणिनिना नोल्लिखितः, अपि च पाणिनेः पूर्वरूपे प्रसिद्धः आसन्। पूर्वाचार्यस्य अधिकांश कृतयः अस्माभिः सह न सन्ति, किन्तु नाना उदाहरणिनां, नाम उल्लेखानां च कारणात् तेषां विषये कतिपयानि वचनानि वक्तुम् आवश्यकम् अस्ति।

**कूटशब्दः** पाणिनि व्याकरणं, प्राक् पाणिनि आचार्याः, माहेश्वर व्याकरणम, वृहस्पति व्याकरणम, इन्द्र व्याकरणम, वायुः, भरद्वाजः, भागुरि, पौष्करसादि, चारायण, काशकृत्स्न, वोयाघ्रपद्य

**प्रस्तावना**
संस्कृतव्याकरणशास्त्राकाशे यद्यपि उज्ज्वलतमः ज्योतिष्कः आचार्यः पाणिनि, तथापि महर्षि पाणिनिः नः तु आदि वैयाकरणाचार्यः। अष्टाध्यायी व्याकरणं न तु प्रथमं संस्कृतव्याकरणम। व्याकरणस्य दीर्घपरम्परां विना कदापि पाणिनि व्याकरणस्य उद्‌भवः सम्भवः न स्यात। पाणिनिः स्वस्य अष्टाध्यायीग्रन्थे यद्यपि कतिपय पूर्वाचार्यानामोल्लेखं विंशति सूत्रेण कृतम, एतद्व्यतीत प्राचीनाचार्याणां व्याकरणशास्त्रस्य वर्णनं अष्टाध्यायीग्रन्थे न तु व्यक्तम। वहूपूर्वाचार्यानां नामानि तेषां मतं च नानाग्रन्थेषु यथा उद्धृतानि तस्मात् एतेषु वहवः पूर्वाचार्याः वैयाकरणाः आसन् इति वक्तुं शक्यते। अधिकांश पूर्वाचार्याणां कृतयः अस्माकं समीपं न अवतरन्ति, परन्तु तेषां नामानि उपलभ्यन्ते। एतत्व्यतीत तेषां केचन मताः वयं सौभाग्येन जानीमः। पाणिनिः पूर्ववर्ती आचार्याणां कृते व्याकरणशास्त्राणां पर्यालोचना समासेन निम्नोक्तभावेन मया प्रदर्शितं यत–

**शिवः महेश्वरः**
शिवस्य अन्यत् नाम महेश्वरः। महेश्वर प्रोक्तं व्याकरणं शिवव्याकरणं अथवा माहेश्वर व्याकरणं इति प्रसिद्धम। केषाञ्चित् मतेन पाणिनिः प्रणीतं व्याकरणं माहेश्वर सम्प्रदायेन सम्बन्धः। तेषां मतेन अष्टाध्यायी व्याकरणस्य मूलस्तम्भः चतुर्दश माहेश्वर सूत्रं शिवसूत्रेति प्रचलतिम। 'महेशादागतम'अस्मिन् अर्थे तस्य नाम अपि माहेश वा वेदाङ्गमाहेशम्। वस्तुतः अयं व्याकरणस्य अस्तित्वं आसीत् वा इति न शंसयः भवितुं अर्हति। चतुर्दशप्रत्याहारसूत्रस्य दार्शनिक व्याख्यानं नन्दीकेश्वरेण प्रकाशितायां काशिकानामिकायां केवलं २७श्लोकतमीकानां पुस्तिकायां प्राप्यते। उपमन्यु इति कश्चित् शिवभक्तः तत्त्वविमर्शिनीनाम्ना टीकां लिखितवान। काशिकायां प्रथमद्वितीयश्लोकः वर्तमानसन्दर्भे महत्वपूर्णः अस्ति।

> "नृत्यावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम।
> उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिबसूत्रजालम।
> अत्र सर्वत्र सूत्रेषु अन्त्यवर्णचतुर्दशम।
> धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये।।"[1]

महाभारतस्य शान्तिपर्वणि शिवसहस्रनाम स्तोत्रे षडङ्गस्य प्रवर्त्तकः शिव इति उच्यते–'वेदात् षडङ्गानुद्धृत्य।'[2] षडङ्गान्तर्गतः व्याकरणस्य प्रधानः अङ्गः। पाणिनीय शिक्षा ग्रन्थे एवमुक्तं यत–"येनाक्षरसमाम्नायमधिगम्य महेश्वरात। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।"[3]

सारस्वतभाष्येऽपि लिखितम–"समुद्रवत् व्याकरणं महेश्वरे, तदर्धकुम्भोद्धरणं वृहस्पतौ। तदभागभागाच्च शतं पुरन्दरे कुशाग्रविन्दुग्रथितं हि पाणिनौ।।"[4] व्यासदेवकृते महाभारतस्य अनुशासनपर्वणि ८४ अध्याये ६०–७२ श्लोकतमे देवानां हिताय शिव महादेवेन अविप्लुतब्रह्मचर्यव्रतं कृतम। तेन शिव महेश्वर–ब्रह्मचारी, उर्ध्ववेरेता, उर्ध्वलिङ्गं तथा उत्तानशायी उच्यते। भारतीय वाङ्मये ब्रह्मणा सह शिवोऽपि अनेकविद्यानां उत्पत्तिकर्ता इति मन्यते।

**वृहस्पतिः**

व्रह्मा परवर्ती व्याकरणशास्त्रप्रवक्तारूपेन वृहस्पति हि सर्वाग्रे उच्यते। अङ्गिरासुतत्वात् 'अङ्गिरसः' इति विश्रुतः। सः देवगुरुः, सुराचार्यः, वाक्पति, देवानां पुरोहितः। ऐतरेय ब्राह्मणे उच्यते –"वृहष्पति वै देवानां पुरोहितः।"[5] छान्दोग्य उपनिषदि वृहस्पति नारदाय सामगानप्रवचनं दत्तवान् । वृहस्पतिना अर्थशास्त्रविषये विशालग्रन्थः रचितः। अस्य अध्यायाः त्रीणि सहस्राणि वर्तन्ते। अस्य ग्रन्थानुसरणेन कौटिल्यस्य अर्थशास्त्रम, कामन्दकीय नीतिसारं, याज्ञवल्क्यस्मृतिशास्त्राणि रचितानि। वृहस्पतिः व्याकरणशिक्षा प्रदानाय इन्द्राय सहस्रवर्षपर्यन्तं उपदिशति। सुदीर्घकालं यावत् देवगुरुः व्याकरणशिक्षाविस्तारं करोति। आचार्यः भर्तृहरिः वृहस्पते व्याकरणशास्त्रस्य 'शव्दपारायण' इति अलिखत्। शव्दपारायणानुसारेण आचार्यः वृहस्पतिना नामाख्यात विषये प्रवचनं क्रियते। प्रातिपदिकः (नाम) तथा धातुसम्वन्धि रूपसादृश्यं शप् आदि विकरणं पुस्तके लिखितमस्ति।

**इन्द्रः**

व्रह्मा तथा देवगुरु वृहस्पतेरनन्तरं देवराजः इन्द्रः व्याकरणशास्त्रवेत्तासीत। इन्द्रः वृहस्पतिं प्रतिपदां पाठयित्वा एव शव्दशास्त्रस्य ज्ञानं प्राप्तुं प्रयतितवान। तैत्तिरीयसंहितायां उक्तम् देवानां प्रार्थनानुसारेण देवराजः इन्द्रः व्याकरणशास्त्रं रचितवान। इन्द्रेण रचितः व्याकरणं ऐन्द्रव्याकरणम। देवराजस्य गुरुः वृहस्पतिः, छात्रश्च भरद्वाजः। यथा प्राक् वाग् अव्याकृतमस्ति तदा देवाः इन्द्राय वाक् विभजितुं इति प्रार्थितः तदा सः देवेभ्यः वायुना सह एकपात्रे सोमरसग्रहणरूप प्रार्थितः वरलाभेन वाक् विभजयामास। इन्द्रस्य पिता कश्यपः प्रजापतिः माता च अदितिरासीत। महाभारते इन्द्रस्य एकादश सहोदरं स्वीकृयते यथा–धाता, अर्यमा,वरुणः, अंशः,भग, विवस्वान, पुषा, पर्जन्य, त्वष्टा, विष्णुः। विष्णुः एतेषां सर्वकणिष्ठः। अग्निः तथा सोमश्च इन्द्रस्य अपरं भ्रातासीतन तु सहोदरः। इन्द्रस्य व्याकरणं तस्य शिष्यः भरद्वाज ऋषिणा प्रकाशितम् । क्रमशः ऐन्द्रव्याकरणसम्प्रदायस्य उद्भवः कृतः। क्षेमेन्द्र प्रणीतं 'वृहत्कथामञ्जरी'ग्रन्थावलम्वने इदं अभिधेयं यत–मगधस्य राजा नन्दराजमन्त्री वररुचिः कात्यायनः इन्द्रस्य छात्रासीत। पाटलिपुत्रनगरस्य अधिवासी वर्ष उपाध्यायः तपसा स्वामिकुमारकार्त्तिकेयं परितृप्त्य एतद् व्याकरणं लब्धवान, तथा च कात्यायनं उपदिष्टवान् पाणिनिस्तु कुत्रापि ऐन्द्रव्याकरणस्य उल्लेखः न करोति। ऐन्द्रव्याकरणस्य प्रभावः प्रातिशाख्येन कातन्त्र वा कलापः व्याकरणं आगतवान। ऐन्द्रव्याकरणस्य प्रथमसूत्रम–'अथ वर्णसमूहः'। दुर्गाचार्येन निरुक्तवृत्तौ लिखितम– 'अर्थःपदम' इत्यैन्द्राणाम। अर्थात् 'ऐन्द्रव्याकरणसम्प्रदायस्य सूत्रं 'अर्थः पदम'।[6]

**वायुः**

तैत्तिरीय संहितायां लिखितं इन्द्रेण वाणीं व्याकृतकरणाय वायुना सहायतां लभते। ऐन्द्रव्याकरण रचणायां वायुना सहयोगं गुरुत्वपूर्णः आसीत्। अस्मात् कारणात् 'वाग् वा ऐन्द्रवायवः' प्रयोगं उल्लेखः।[7] 'शव्दशास्त्रआविशारदः' वायुदेवताकं वायुपुराणे वर्ण्यते। वायुदेवताकः पत्नी अञ्जनी तथा पुत्रश्च महावली हनुमानवायुर्वै महान् वैशाली योद्धा–महाभारते शान्तिपर्वणि लिखितमस्ति। वायुपुराणानुसारेन वायुपुर नाम वायुनगरमासीत्।

**भरद्वाजः**

आङ्गिरस वृहस्पतेः पुत्रः भरद्वाजः ब्राह्मणग्रन्थे देवगुरु वृहस्पतिः देवतानां पुरोहितः, अग्निर्होता इति कथितः । भरद्वाजस्य एकविंशतिः पुत्राः आसन। ऋजिष्वा, गर्ग, नर, पायु, वसु, शास्, शिरिम्विट्ठ, शुनहोत्र, सप्रथ, सुहोत्र नामकः पुत्राः, रात्रिः नाम्नी मन्त्रद्रष्टा पुत्री उल्लिख्यन्ते। वायुपुराणे उल्लिखित नर तथा गर्गः भरद्वाजस्य साक्षात् पुत्रः न भवति। परन्तु सुनन्दा नाम्नी चक्रवर्ती महाराजः भरतस्य पत्न्याः गर्भे भरद्वाजेन नियोगः विधिना उत्पन्नः भुवमन्योः पुत्रः आसीत। भरद्वाजः इन्द्रस्य व्याकरणं अधीतवान। इन्द्रोऽपि भरद्वाजं घोषवर्णस्य तथा उष्मवर्णस्य उपदेशं दत्तवान। भरद्वाजेन तस्य छात्राणां ऋषिणामपि व्याकरणशास्त्रं उपदिष्टयामास। व्याकरणशास्त्रं विना आयुर्वेदशास्त्रं भरद्वाजेन शिष्याणां प्रति उपदिष्टः। भरद्वाजस्य व्याकरणं अधुना अनुपलब्धम्। एतद्व्यतीत आयुर्वेदशास्त्रं, धनुर्वेदं, अर्थशास्त्रम्, पुराणं, धर्मशास्त्रविषये आचार्यस्य रचना अत्युत्तमम्।[8]

**भागुरि**

भागुरि व्याकरणाचार्यस्य नाम पाणिनीयाष्टके यद्यपि नोपलब्धं तथापि भागुरि आचार्यस्य प्रवचनं स्पष्टम। 'अव' तथा 'अपि' उपसर्गस्य व्यवहारे अकारः लोपः प्रसङ्गः भागुरिणा प्रदर्शितः। भागुरे पिता भगुरः तथा गुरुश्च वृहद्गर्गः। भागुरि प्रणीतं व्याकरणं पाणिनि अपेक्षा किञ्चिदधिकं विस्तृतम। श्लोकवद्ध व्याकरणं भागुरिणा लिखितम। भाषावृत्तिव्याकरणे भागुरिवचनं 'नप्ता' स्थले आचार्यः पाणिनेर्मतं 'नप्त्री' भवति। भागुरि व्याकरणस्य प्रवचनं यथोपलब्धं– "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः"[9]। आपः चौव हलन्तानां यथा वाचा निशा दिशा।। भागुरिकृत अन्यः ग्रन्थाः प्रपञ्चः हृदयं, चरणव्युहटीका, जैमिनीय गृह्यसूत्रम् तथा गोभिलगृह्यप्रकाशिका उपलब्धाः। अलङ्कारः शास्त्रे कविः सोमेश्वरेण भागुरिं प्रति प्रवचनं– "भागुरिस्तु प्रथमं निर्दिष्टानां प्रश्नपूर्वकाणामर्थान्तरविषये निषेधोऽप्यनुनिर्दिष्टश्चेत् सोऽपि यथासंख्यालङ्कार इति।"[10] अमरकोशस्य टीकाविषये भागुरिकृत वहवः व्याख्यानकं उद्धरणञ्च उपलब्धाम। सृष्टिधरकृते भाषावृत्तिनामकग्रन्थे भागुरिकृत 'त्रिकाण्ड' नाम कोषः उल्लिखितः। त्रिकाण्डग्रन्थमाश्रित्य सर्वानन्देन 'टीकासर्वस्व' पुस्तके वहवः प्रवचनमुल्लिखितम। एतद्व्यतीत भागुरिणा मनुस्मृतिभाष्यमपि लिखितम। व्याकरण, संहिता, कोषालङ्कार ग्रन्थे भागुरि वचनं एकेन वा वहुधा प्रवक्ता रचना अस्मिन् विषये पर्याप्तं तथ्यं नास्ति।

**पौष्करसादि**

पुष्करसस्य अपत्यं पौष्करसम् इति तद्धित प्रत्ययान्तेन प्राप्यते। पाणिनि सूत्रेण अस्य आचार्यस्य उल्लेखं नास्ति। आचार्यः पतञ्जलिकृते महाभाष्ये वार्तिकस्थाने पौष्करसनामोल्लेख कृतः। प्राग्देशवासी पौष्करसः कृष्णयजुर्वेदस्य शाखायां प्रवचनमुल्लिखितम। आचार्यः पौष्करसः पाणिनिपूर्ववर्त्ती व्याकरणाचार्यरूपेन स्वीकृतः। अस्य व्याकरणग्रन्थ विषये उल्लेखं नास्ति।

**चारायण**

आचार्य चारायणस्य व्याकरणबिषयकग्रन्थः नोपलब्धः। 'चर'स्य अपत्यं चारायणः भवति। अर्थात् चारायणस्य पिता 'चर'इति सिद्धान्तः। पतञ्जलिकृते महाभाष्ये 'कम्वलचारायणीया' उदाहरणे चारायणस्य छात्राणां कम्वलप्रदानं अभिप्रेतमस्ति।[11] वात्स्यायनस्य कामसूत्रे चारायणस्य नामोल्लेखं वारत्रयं दृष्टम। अर्थशास्त्रकारकौटिल्येन चारायणस्य मतमेकं लिखितम् यत–तृणमतिदीर्घमिति 'चारायणः'।[12] कृष्णयजुर्वेदस्य चारायणीयशाखाप्रवक्ता चारायणः। परन्तु इमां शाखाः अप्राप्ता। चारायणसंहिता कृष्णयजुर्वेदस्य अन्यतमा शाखाः। अस्यां शाखायां वर्णनं भगवदत्तकृत 'वैदिक वाङ्मय का इतिहास' प्रथमभागे वर्ण्यते। चारायणस्य चारायणसंहितां विना नारायणी शिक्षा तथा साहित्यिक ग्रन्थः प्राप्तः।

**काशकृत्स्न**

पाणिनीयशव्दानुशासने काशकृत्स्नवैयाकरणाचार्यस्य यद्यपि नामोल्लेखं नास्ति तथापि पतञ्जलिकृते महाभाष्ये काशकृत्स्न तथा आपिशलस्य उल्लेखः दृश्यते। मुग्धबोधव्याकारः वोपदेवेन तस्य ग्रन्थे काशकृत्स्नस्य नामोल्लेखः कृतः। काशकृत्स्नीयस्य अपत्यं इत्यर्थे काशकृत्स्न पदस्य व्यवहारः भवति। वामन–जयादित्य विरचितः काशिकावृत्तौ त्रिकं काशं कृत्स्नं इत्यस्य प्रयोगः विहितः। महाकविः भासेन 'यज्ञफल' नाम नाटके काशकृत्स्न मीमांसाशास्त्रस्य उल्लेखः विहितः। वोधायनगृह्यसूत्रे काशकृत्स्नमतं सुस्पष्टम।

वेदान्तसूत्रानुसारं काशकृत्स्नस्य मतं स्मृतम्। काशकृत्स्न स्वीयं शास्त्रं द्विधा प्रवचनं कृतम।[13]

**वैयाग्रपद्य**

वैयाग्रपद्यस्य व्याकरणग्रन्थः अष्टाध्यायीव्याकरणग्रन्थे नोपलब्धः। काशिकायां दृष्टम् –"गुणंत्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः"।[14] अस्य पुस्तके 'पूर्वत्रासिद्धम् 'सूत्रे उद्धृत 'शुष्किका शुष्कजङ्घा च'कारिकायां आचार्यः भट्टोजी दीक्षितेन वैयाग्रपद्यलिखित बार्तिकं स्वीकरोति। महाभारतस्य अनुशासनपर्वणि अनुसारेण व्याघ्रपाद् महर्षिः वशिष्ठस्य पुत्रः आसीत।[15] वैयाग्रपद्यस्य व्याकरणग्रन्थाः काशिकानुसारेण यथा – दशकं 'वैयाघ्रपदीयम' इति।

एतद्व्यतीत माध्यन्दिनि, रौढि, शौनकि, गौतमः, व्याडि प्रभृतयः आचार्याणां व्याकरणग्रन्थाः पाणिनिः व्याकरणे न उल्लिखिताः।

**निष्कर्षः**

आचार्यः पाणिनिः प्रणीत अष्टाध्यायी व्याकरणं सकलशास्त्रस्य लाभप्रदं सर्वशास्त्राणां प्रदीपं कथ्यते । यद्यपि एतद् व्याकरणं सम्पूर्णं व्याकरणं वा कृत्स्नं व्याकरणमुच्यते, परन्तु अस्य व्याकरणस्य पूर्वं प्रजापति ब्रह्मण –वृहष्पति–इन्द्र सम्प्रदायस्य व्याकरणं लिखितं पठितं च इति विविधाः उल्लेखाः तस्य प्रमाणम। पाणिनिः व्याकरणस्य अभ्यासात् पूर्वं एतेषां व्याकरणानां चर्चा व्याकरणशिक्षार्थिनां अधिकं प्रोत्साहनं करिष्यन्ति। अतः पाणिनिः अनुल्लिखित कतिपय प्राक् व्याकरणाचार्याणां प्रासङ्गिकता प्रकाशिताः सन्ति।

**सन्दर्भः**


1. Dr. K. S. Balasubramaniam & Dr. T. V. Vasudeva, The Kuppuswami, काशिका नान्दिकेश्वर, Sastri Research Institute, Chennai, 2009, Page.3
2. महाभारत, शान्तिपर्व, 284/192
3. पाणिनीयशिक्षा, पृ. 78
4. परिभाषावृत्तिः 3, पृ 126
5. संस्कृत व्याकरणशास्त्र का इतिहास, पृ. 68
6. संस्कृत व्याकरणशास्त्र का इतिहास, पृ. 92–102
7. तैत्तिरीयसंहिता 6.4.7
8. संस्कृत व्याकरणशास्त्र का इतिहास, पृ. 104–110
9. न्यासः, 6.2.37
10. मद्रास राजकीय हस्तलेख पुस्तकालय का सूचीपत्र भाग 1, खण्ड 1, पृ० 2865, ग्रन्थाङ्क 2126
11. महाभाष्य, 1.1.73
12. अर्थशास्त्र, अधि.5 अध्याय.5
13. संस्कृत व्याकरणशास्त्र का इतिहास, पृ. 122–142
14. काशिका, 7.1.95
15. महाभारत, अनुशासनपर्व 53.30